No. २५७७ क

Title गोपाल पञ्चाङ्गम्

Author

Extent ६७ पत्र Age सं. १९३१

Subject तंत्र

नं॰ १११ गोपाल पंचांग

५२९

37

नं० १५66

S975

F 69

Complete

नं० १५66 [illegible]

[illegible]

गोपाल पंचांगः

ॐश्रीगोपालायनमः अथगोपालपटलेलिख्यते ॐश्रीगो
पीजनांतेप्रवदेद्वल्लभायाग्निसुंदरी अयंदशाक्षरोमंत्रोह।
शहष्टफलप्रदः अथपूजाप्रकरणं कृष्णायपदमाभाष्य।
गोविंदायततःपरं गोपीजनपदस्यांतेवल्लभायद्विठावपि २
कामबीजादिराख्यातोमंत्रोष्टादशाक्षरः अस्यश्रीगोपाल
मंत्रस्य नारदऋषिः गायत्रीछंदः श्रीविष्णुर्देवता क्लींबीजं
स्वाहाशक्तिः श्रीकृष्णप्रकृतिदुर्गाधिष्ठात्रीदेवता पुरुषा

थेचतुर्थ्येविनियोगः क्लींकृष्णायहृदयायनमः गोविं
दायशिरसेस्वाहा गोपीजनशिखायैवषट् वल्लभायकव
चायहुं स्वाहानेत्रत्रयायवौषट् हाग्रस्त्रायफट् इत्यंगन्यासः
अथध्यानं ॐस्मेरेहृदावनेरम्येमोहयंतमनारतं गोविंदंपु
ण्डरीकाक्षंगोपकन्याःसहस्रशः आत्मनोवदनांभोजप्रेषिता
क्षिमधुव्रताः पीडिताःकामबीजेनविवशाश्लेषणोत्सुकाः
मुक्ताहारलसत्पीनोत्तुंगस्तनभरानता स्रस्तधंमिल्लवसना

गो॰ मदस्खलितभाषणः दंतपंक्तिप्रभाज्ञासितस्फटमानायरांविनाः विलासभयंतीविविधैर्विभ्रमैर्भीवगर्जितैः इतिध्यानं
प॰ प्रणतहृदयंजपेत् ग्रथषडंगवीजं पंचांतकोयराम्स्थोमनुविंदुविभूषितः विंडुवीजमितिप्रोक्तंसर्वसिद्धिकरंपरं पतेनस्त्रौंइतिभवति पंचांतकोणकारः यरालकारः मनुविंडु
२ विभूषितः ॐकारःविंडुरनुस्वारस्तेनस्त्रौंइतिभवति ग्रथकामवीजं ब्रह्माभ्रष्पामनासीनःशक्तिविंडुविभूषितः वीजं।
२

मनोभवं प्रोक्तं जगत्त्रितयमोहनं ऋषिः संमोहनः प्रोक्तो गायत्रं
छंद ईरितं सर्वसंमोहनः साक्षाद्देवता मकरध्वजः क्लीं इति मंत्रः
बीजेन दीर्घयुक्तेन षडंगविधिरीरितः अथ ध्यानं ओं जयारुण
रत्नविभूषणाढ्यं मीनध्वजं चारुकृतांगरागं करांबुजैरंकुश
मिक्षुचापं पुष्पास्त्रपाशौ दधतं भजामि लक्षत्रयं जपेन्मंत्रम।
घुरत्रयसंयुतैः पुष्पैः किंशुकजैः फहोमं कुर्याद्दशांशतः
चतुर्लक्षं जपेत् अस्य मंत्रस्य नारायण ऋषिः श्रीगायत्रीछंद :

गो॰ प॰ १ श्रीकृष्णोदेवता धर्मार्थचतुष्टयेविनियोगः आचक्राय
स्वाहाहृदयायनमः विचक्रायस्वाहाशिरसेस्वाहा सुचक्रा
3 यस्वाहाशिखायैवषट् त्रैलोक्यरक्षणचक्रायस्वाहाकवचा
यहुं असुरान्तकस्वाहानेत्रत्रयायवौषट् चक्रायस्वाहाअस्त्रा
यफट् इतिअंगमंत्रः पीठशक्तिःपीठमंत्रश्चपूर्ववत् वाग्भवो
मारबीजंचक्रेशायभुवनेश्वरी गोविंदायरमागोपीजनव
ल्लभंशिरः वक्रदेशसरोपीतःकुक्षस्तसर्वंमूर्द्धन्तः कुक्षः

सकारः सर्वमूर्द्धनः स्वाहानंतरमित्यर्थः अष्टादशमंत्रः ॐ क्लीं कृष्णाय ह्रीं गोविंदाय श्रीं गोपीजनवल्लभाय स्वाहा सौः अस्य मंत्रस्य नारदऋषिः गायत्रंछंदः श्रीकृष्णो देवता क्लीं बीजं स्वाहा शक्तिः कृष्णप्रकृतिर्दुर्गाधिष्ठात्री देवता विद्या धर्माष्टसिद्धौ विनियोगः क्लीं हृदयाय नमः कृष्णाय शिरसे स्वाहा गोविंदाय शिखायै वषट् गोपीजनकवचाय हुं स्वाने त्रत्रयाय वौषट् हाऽस्त्राय फट् इत्यंगमंत्रः अथध्यानं वामेर्धे

गो॰ हस्तेदधतंविद्यासर्वस्वपुस्तकं अक्षमालांवदक्षेर्ध्वस्फाटिकीं
प॰ मात्रकामयी शब्दब्रह्ममयंवेणुमधःपाणिद्वयेरितं ध्यायेत
५ पीतवसनेश्यामलंकोमलच्छविं वर्हिवर्हकृतोत्तंससर्वांगस
5 र्ववेदिभिः उपासितंसुरगणैरुपनिषद्भिर्हरिंसदा ध्यात्वैवंप्रस
दावेशविलासंभुवनेश्वरं त्रिवत्नलक्षंजपेत् पीठशक्त्यादिकं
एवंवत् श्रीशक्तिस्मरकृष्णायगोविंदायस्वाहा व्याख्याणैः
द्वादशार्णमंत्रोयथा श्रींह्रींक्लींकृष्णायगोविंदायस्वाहा

अस्यमंत्रस्य ब्रह्माऋषिः गायत्रेछंदः श्रीकृष्णोदेवता पुरुषार्थे
विनियोगः ॐश्रीं हृदयायनमः ह्रीं शिरसेस्वाहा क्लींशिखा
यैवषट् कृष्णायकवचायहुं स्वानेत्रत्रयायवौषट् हायस्त्राय
फट् इत्यंगमंत्रः अथमन्त्रोपिएवंवत् ॐश्रींह्रींक्लींकृष्णायह्रीं
श्रींस्वाहा अविघ्नहवक्राय श्रीशक्तिकामएवंगिजन्मशा
क्तिरमंतिका द्वादशाक्षरमपवादोस्याद्वेष्कतिरमाग्नितः
मंत्रोविकृतिरव्याणांवाचकाद्येकितांविभो द्वादशाक्षरमं

गो. प. ५

तषोऽष्टाक्षरः मन्त्रोऽस्मादिह्यष्टाक्षरः प्रतिपादितः यंत्रादौ।
शक्तिरमान्वितइतिमंत्रंवयइतिकेचित् अनयोर्मंत्रयोर्ब्रह्मऋ
षिः गायत्रीछंदः श्रीकृष्णोदेवता मंपन्नखवसौभाग्यभविनियो
गः एतयोरपिमंत्रयोरंगमंत्रध्याने विज्ञाय सर्वविंशत्प्यक्षरव
त् आचक्रायसुदर्शनायनमः विचक्रायशिरसे स्वाहा सुचक्रा
यशिखायैवषट् कुशलायकवचायहुं असुरांतकचक्रायनेत्र
यायवौषट् स्वाहाअस्त्रायफट् इत्यंगमंत्रः अथध्याने ॐवरदा

मथहृल्लांमंत्रिशिष्यल्लांगकंप्रिये पद्मोत्पलकरेतांमंत्रिशिष्यच
कथयेज्ज्वलं श्रियेहक्लिणीमममामेवक्रशांवोडपरितेनद
त्तिणहृल्लयोदशलक्षंजपेत् पीठशक्तिमंत्राश्चएवंवत् ग्रहा
दशनामाख्यातोमंत्रस्तपनश्चदः मंत्रोयथा क्लींकृष्णायगो
विंदायगोपीजनवल्लभायस्वाहा क्लींकृष्णस्यमंत्रस्यना
रदऋषिः गायत्रीछंदः श्रीकृष्णोदेवता क्लींबीजं स्वाहाशक्तिः
ममाभीष्टसिद्धौविनियोगः क्लींहृदयायनमः क्लींशिरसे

गो. स. ५

स्वाहा ह्रूं शिखायै वषट् ह्रैं कवचाय हुं ह्रौं नेत्रत्रयाय वौष
ट् ह्रः अस्त्राय फट् इत्यंगमंत्रः पीठशक्तिमंत्राश्च पूर्ववत्
अथ ध्यानं ॐ पाणौ पायसभक्तमाहितरसं बिभ्रन्मदा दक्षि
णे सव्ये शारदचंद्रमंडलनिभं हैयंगवीनं दधत् कंठे कल्पित
पुंडरीकनखमप्युद्दामदीप्तिं दधद्देवो दिव्यदिगंबरो दिशतु
वः सौख्यं यशोदासुतः पुंडरीकनखव्याघ्रनखं द्वात्रिंशल्लक्षं
जपेत् वाग्भवं मारबीजं चक्रं स्वाय भुवनेश्वरी गोविंदाय रमा

6

गोपीजनवल्लभाङे॰शिरः चतुर्दशस्वरोपेतः शुक्रस्सर्ववृ
र्धितः द्वात्रिंशदक्षरो मंत्रो वागीशत्वप्रदायकः तदर्थितः स्वा
हान्तेतरमितिस्मर्थः केचित्ततदर्थितः तेषां वर्णानामनुपरिग्रथ।
मतश्चाष्ट मंत्रा यथा क्लींकृष्णाय क्लींगोविंदाय श्रींगोपी
जनवल्लभाय स्वाहा सौः इति मंत्रश्चतुर्दशस्वरः ॐकारः शुक्रः
सकारः अस्य मंत्रस्य नारद ऋषिः गायत्री छंदः श्रीकृष्णो देव
ता क्लींबीजं स्वाहा शक्तिः कृष्णप्रकृति दुर्गाधिष्ठात्री देवता

विद्याद्यभीष्टसिद्धौविनियोगः अथमन्त्रवेमंगमंत्रध्यानेविद्या
यविंशत्यर्णविग्रहियेयं अंगमंत्रास्त्र क्लींकृष्णायहृदयायनमः
गोविंदायशिरसेस्वाहा गोपीजनशिखायैवषट् वल्लभायक
वचायहुं स्वाहानेत्रत्रयायवौषट् हाअस्त्रायफट् अथध्याने ओं।
वामेंधरन्तेदधतेविद्यासर्वस्यपुस्तकं अक्षमालांचदक्षेयेस्फा
टिकीमात्रकामयी शब्दब्रह्ममयंवेणुमथः पाणिद्वयेरिते ध्यायं
तेपीतवसनेश्यामलेकोमलच्छविं बर्हिबर्हकृतोत्तंसंसर्वांगेस

वैवेद्धिभिः उपासितं स्वरगणैस्तपतिष्ठेद्धरिं सदा ध्यात्वैवं प्रमदा
वेशविलासं भुवनेश्वरं चतुर्लक्षं जपेन्मंत्रमिमं मंत्री ससंयतः
पलाशपुष्पैः स्वाज्यैस्त्वनारिंशान्मदशकं जुहुयात्कर्मणा तेन म
नुः सिद्धो भवेद्ध्रुवं इति श्रीगोपालमंत्रः अथ वैष्णवानां द्वादश
सिद्धिरहोच्यते अहो समर्पणं चैव तथानुगमनं हरेः भक्त्या प्रद
क्षिणं चैव पादयोः शोधने पुनः पूजार्थं पत्रपुष्पाणां भक्त्यैव चोल
नं हरेः करयोः सर्वपुष्टीनां मियंपुष्टिर्विशिष्यते तन्नामकीर्त

गो. चैवगुणानामपिकीर्तितं भक्त्या श्रीकमलदेवस्यवचसः शुद्धिरि
प. ष्यते तत्कथाश्रवणंचैव तत्स्तोत्रस्यनिरीक्षणं श्रोत्रयोर्नेत्रयोश्चै
८ वशुद्धिः सम्यगिहोच्यते पादोदकंचनिर्माल्यंशुभ्राणामपिधार
8 णं उच्यतेशिरसः [illegible]द्धिंशणतस्यहरेः शुभमान् घ्राणाणांगंधशुभ्रा
दिनिर्माल्यसतपायनः विशुद्धिः स्यादंतरसघ्राणस्यापिविधी
यते तत्रशुभ्रादिकंयत्तत्कुसुमपादयुग्मार्पितं तदेकेणावनेलोकेत
हि सर्वंविशोधयेत् ललाटेचाग्रदाकार्यामूर्ध्निचापशरास्तथा नेद

केचेवल्लन्मध्ये शंखचक्रेभुजद्वये शंखचक्रांकितो विप्रः श्म
शाने म्रियते यदि प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य गौतमः
तथा चोक्तं द्वारवत्यां ये ब्राह्मणामधिकम् यत्नसंततमशंखा
दिलिंगांकिततनुः पुनः सेभाच्छैरौरवं याति यावदिंद्राश्चतुर्द
श चक्रांकिततनुं यत्र तत्र कोपि वसेद्विशेत् यदि तिष्ठेन्महा
पापी महस्रब्रह्महा भवेत् चक्रांकिततनुं दृष्ट्वा पश्येत्सूर्यं जपे
द्वः जपेच्छ्रपोहंषंसहस्रकामनव्या रौरवं व्रजेत् ब्राह्मणस्तनुर्वे

गो॰ प॰ २५

9

यासर्वैर्वेदसमाश्रिता साचेत्संतापिताराजन्किंवसामिमैहेन
मः वक्षोकितनत्रुवांपिराजलिंगांकितोपिवा नाधिकारेपरि
ज्ञेयः श्रौतस्मार्तैशुकर्मस्त पंचोपचारगंदघादर्शनेष्ठोदिपंव
भिः यथोक्तवस्त्रसंपकैःधियामेकल्पपूजयेत् विभर्तिस्त्री
निर्माल्यंकेशवस्यैतंतथा अनिर्वेद्यवनाश्नातितस्यतत्फति
केशवः विस्मयमौतरे सर्वान्समर्चयेद्दानेकंवादेवमर्चयेत्
देवोचीश्चद्वयापूजाश्रुवंतल्लोकमाप्नुयात् अलाभेसतिशक्षा

णां पत्राण्यपि निवेदयेत् तन्नामकीर्तनेनैव गुणानामपि की
र्तनं भक्त्या श्रीकृष्णदेवस्य वचसः शुद्धिरिष्यते तत्कथाश्रवणे
नैव तत्प्रोक्तश्रुतिनिरीक्षणे श्रोत्रयोर्नेत्रयोश्चैव शुद्धिः सम्यगिष्य
ते फलानामपि लाभे तु तृणगुल्मौषधीरपि औषधीनाम।
लाभे च जलमात्रं च निवेदयेत् जलाभावे तु भावेन भक्त्या संपूजि।
तो भवेत् केशवाग्रे न तु गीतं न कारयति हरेर्दिने वह्निना किं न
दग्धोसौ यातः किं न रसातले अथ द्वात्रिंशदपराधाः यानेवापा

गो॰ प॰ ९

उक्ताभिर्वीयाने भगवतो गृहे देवोत्सवेष्वेवायाग्रप्रणामस्त
दग्रतः उच्छिष्टे चैव वाशौचे भगवद्वंदनादिकं एकहस्तप्रणा
मश्च पत्स्वरस्तात्प्रदक्षिणं पादप्रसारणं चाग्रतस्तथा पर्यंकबंधनं
शयनं भक्षणं चापि मिथ्याभाषणमेव च उच्चैर्भाषा मिथो जल्
प्यो रोदनादि च विग्रहः निग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणं
कंबलावरणं चैव परनिंदा परस्तुतिः अश्लीलभाषणं चैव अधोवा
युविमोक्षणं शक्तौ गौणोपचारस्य अनिवेदितभक्षणं तत्तत्का

लोऽङ्गवानां च फलादीनामर्पणे विनियुक्तावशिष्टस्य प्रदाने भो
जने च यत् स्पृष्टोऽहत्वा मन्त्रेनैव समन्तोनिंदा मतोऽस्तुतिः गुर्वमाने
निजस्तोत्रे देवतानिंदने तथा अपरायस्तथा विसोहीत्रिंशत्परि
कीर्तिताः इति श्री सम्मोहनतन्त्रे गोपालपटलः समाप्तः ॥

गो॰ प॰ १

ॐ श्रीगोपालाय नमः अथ गोपालपद्धतिर्लिख्यते अथ नाप
द्धतिं वक्ष्ये गोपालार्चनसंयुतां गद्यपद्यमयीं गोप्यां सकलागमनि
श्चितां प्रातःकृत्यमकृत्वा तु यो देवो भक्तितोर्चयेत् तस्य पूजा तु
विफला शौचहीना यथा क्रिया प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्वि
भुजं गुरुं वराभयकरं शान्तं स्मरेत्तन्नामपूर्वकं ॐ ब्रां ह्रीं स्युहूर्तेश
यनतलाड्याय कारुण्यायोप्रहाल्प निजासने समुपविश्य नि
जशिरसि श्वेतवर्णाधोमुखकमलसहस्रदलकमलकर्णिकां

तगितंचंद्रमंडलसिंहासनोपरि निषण्णं स्वगुरुं शुक्लवर्णं शुक्ला
लंकारभूषितं ज्ञानानंदमुदितमानसं सच्चिदानंदविग्रहं त्रिन
यनं चतुर्भुजं ज्ञानमुद्रापुस्तकवराभयकरं वामांगे वामहस्त
धृतकमलया रक्तवसनाभरणया स्वशक्त्या दक्षिणभुजेनालि
गितं सर्वदेवादिदेवं सर्वतीर्थतीर्थं परमदेवस्वरूपं शांतं स्व
सवं ध्यात्वा तच्चरणकमलयुगलविगलदमृतधारया स्वात्मा
नं प्लुतं विभाव्य मानसोपचारैराराधयेद्धया लक्ष्यमात्मके

गो. पू. १

2

गंधं समर्पयामि नमः हं आकाशात्मकं पुष्पं समर्पयामि नमः
यं वाय्वात्मकं धूपं समर्पयामि नमः रं वह्न्यात्मकं दीपं समर्पया
मि नमः वं अमृतात्मकं नानानैवेद्यं समर्पयामि नमः सं सर्वात्म
कं फलमूलादिकं समर्पयामि नमः ततः श्रीगुरुपादुका दश
धा स्मृत्वा प्रणाममंत्रान्पठेद्यथा ॐ नमामि सद्गुरुं शांतं प्रत्यक्ष
देवरूपिणं शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये १ श्रीगुरुं
परमानंदं वंदाम्यानंदविग्रहं यस्य सान्निध्यमात्रेण चिदानंदायते

पं २ अखंडमंडलाकारं व्याप्तं येन चराचरं तत्पदं दर्शितं येन तस्मै श्री
गुरवे नमः ३ अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मी
लितं येन तस्मै श्रीगुरवे नमः ४ गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुः साक्षान्म
हेश्वरः गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ५ नमस्तेनाथ भगवन्
शिवाय गुरुरूपिणे विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रहः ६ न
वाय नवरूपाय परमार्थैकरूपिणे सर्वाज्ञानतमोभेदभानवे चिद्घना
यते ७ स्वतंत्राय दयाक्लृप्तविग्रहाय परात्मने परतंत्राय भक्तानां भव्या

गौ. प. ३

नांभवरूपिणि ८ विवेकिनां विवेकाय विमर्शाय विमर्शिनी प्रका
शिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणि ९ पुरस्तात्पार्श्वयोः पृष्ठे नम
स्कुर्यामुपर्यधः सदा मच्चित्तरूपेण विधेहि भवदासनं इति पूजनम्।
एवं स्वप्रसन्नं विभाव्य मनसा तदाज्ञां गृहीत्वा मूलाधारे स्वर्णवर्णे
चतुर्दलकमलकर्णिकान्तर्गतत्रिकोणपीठोपरि परां शक्तिं कुण्डलि
नीं उद्यद्दिनकरसहस्रभास्वरां विद्युत्कोटिसन्निभां पंचाशद्वर्णवि
ग्रहामष्टात्रिंशत्कलारूपिणीं त्रिधामधामान्तः सर्पाकारां सार्धत्रि।

3

वलयाम्बर्धसुप्तां विसतन्तुतनीयसीं स्वयंभुं विभाव्य श्रीगुरूपदि
ष्टमार्गेण निजसहजनादेन सचेतनां विभाव्य तत्र चतुर्दलेषु वं
शं षं सं इति पत्रेषु मध्ये मूलेन नवसहस्रं ततः स्वाधिष्ठाने विद्रु
मवर्णे षड्दलकमले तां नीत्वा तत्र बं भं मं यं रं लं इति पत्रेषु म
ध्ये मूलेन नवसहस्रं ततः मणिपूरके नाभौ नीलवर्णे दशदलक
मले तां नीत्वा तत्र डं ढं णं तं थं दं धं नं पं फं इति पत्रेषु मध्ये मूलेन नव
सहस्रं ततः अनाहते पिंगलवर्णे द्वादशकमले तां नीत्वा तत्र

गो· ए· ८ ५

कंखंगंघंङं.चंछंजंझंञंटंठंइतिपत्रेषुमध्येमूलेनचसंपूज्य ततो
विशुद्धौकंठेस्थकर्णौषोडशदलकमलेतांनीत्वा अंआंइंईंउंऊं
ऋंॠंऌंॡंएंऐंओंऔंअंअः इतिपत्रेषुमध्येमूलेनचसंपूज्य त
तः आज्ञाचक्रेभ्रूमध्येविद्युद्वर्णेद्विदलकमलेतांनीत्वा तत्र हंक्षं
नमः इतिपत्रयोर्मध्येमूलेनचसंपूज्य ततोबिंदुरूपेतेजोमयप
रमशिवेनसहैकतांनीत्वा तत्रनादश्रवणतत्परोभूत्वातल्लयंवि
भाव्य ततोवारेहंसोहमितिमंत्रेणकमलात्कमलमवरोह्य

मानं आज्ञाचक्रादिक्रमेण नेष्ठते ष्ठकमलेष्ठते स्वैरं तैरः संहस्र
मानं ननरा धारत नद्रात स्लनहूणेतनदर्पिदेवताः संतर्पयंती
मूलाधारे स्थापयेत् ॥ इत्यारोहावरोहक्रमेण पराणशक्तिं कुंडलि
नी ध्याता ॥ ॐ प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेप्यमृता
यमानां ॥ अंतःपदव्यामनुसंचरंतीमानंदरूपामबलां प्रपद्ये ॥ ना
हमस्मि न चान्योस्मि ध्येयवाज्ञनविघते ॥ आनंदपदसंलीनं मनः स
मरसीगते ॥ अहं देवो न चान्योस्मि ब्रह्मैवाहं न शोकभाक् ॥ सच्चिदा

गो॰ मू॰ ५

5

तेदरूपोहं स्वात्मानमितिविंतयेत् ततोमूलादिब्रह्मरंध्रांतंमू
लविद्या मुद्यद्दिनकरसहस्रभास्वरां तेजोमयीमखंडं ध्यात्वा त
त्तेजसाव्याप्तस्वदेहं विचिंत्य तत्तेजसापरिणतं श्रीगोपाल
वासनं ध्यात्वा मानसोपचारैः संपूज्य मूलेनप्राणायामऋष्या
दिकरषडंगन्यासानिदधीत यथा ॐ अस्य श्रीगोपालमंत्रस्य
नारदऋषिः गायत्रीछंदः श्रीविष्णुर्देवता क्लींबीजं स्वाहाश
क्तिः श्रीगोपालप्रीत्यर्थेजपेविनियोगः इतिकृतांजलिःस्मृत्वा

स्येतत् नारदऋषियेनमः शिरसि गायत्रीछंदसेनमोमुखे श्री
विश्वदेवतायैनमः हृदि क्लींबीजायनमः नाभौ स्वाहाशक्ति
येनमः गुह्ये श्रीगोपालप्रीत्यर्थेजपेविनियोगः सर्वांगेषु इति
ऋष्यादिन्यासः अथकरन्यासः ॐ क्लींअंगुष्ठाभ्यांनमः कृष्णायत
र्जनीभ्यांस्वाहा गोविंदायमध्यमाभ्यांवषट् गोपीजनअनामिका
भ्यांहुं वल्लभायकनिष्ठकाभ्यांवोषट् क्लींस्वाहाकरतलकरपृष्ठा
भ्यांफट् इतिकरन्यासः अथषडंगन्यासः ॐ क्लींहृदयायनमः

गो॰ पू॰ ६ कृष्णाय शिरसे स्वाहा गोविंदाय शिखायै वषट् गोपीजनकवचा
यहुं वल्लभाय नेत्रत्रयाय वौषट् श्रीं स्वाहा अस्त्राय फट् इति षडंग
न्यासः अथ ध्यानं ॐ जयाहरणा रत्नविभूषणाभ्रमीनध्वजे वाह
6 कृतांगगनांग करांभुजेरुशाभिल्लवांपष्ट्यासपाणोद्यतं भ।
जामि इति ध्यानं मंत्रसंस्कारं जपोविधा ॐ क्लीं कृष्णाय गोविंदा
यगोपीजनवल्लभाय श्रीं स्वाहा मंत्रं दशाक्षरमा ॐ मालेमा
लेमहामाले सर्वतत्त्वस्वरूपिणि चतुर्वर्गस्त्वयिन्यस्तस्तस्मा।

न्मेसिद्धिदाभव इत्यादिपठित्वा मनसामालांसंस्पृश्य गमविघ्नं
कुरुमालेत्वंराजतःशाश्वतोपिवा सर्वेषामाद्भिन्नसंघातातद्दत्तमोप
रमेश्वर इतिदक्षकरेणमालांगृहीत्वा ॐक्लींगोपालायनमः
इतिमूलमंत्रंस्मरन् यथाशक्तिजपंविधाय जपान्ते त्वंमालेस
र्वदेवानांप्रीतिदाशुभदामता शुभंकुरुष्वमेभद्रेयशोवीर्यंच
सर्वदा इत्यादिपठन्नशिरसिमालांसंस्थाप्य पुनरपिरक्षादि
करषडंगानिविधाय गुह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपं

गो॰ ह॰ ८

सिद्धिर्भवतु मे देव तत्प्रसादान्महेश्वर प्रातःप्रभृति सायांतं सायां
तं प्रातरंततः यत्करोमि जगन्नाथस्तदस्तु तव पूजनं इत्यादि प
ठित्वा अद्य पूर्वेद्युरहोरात्राचरितउच्छ्वासनिःश्वासात्मकं षट्
शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपं मूलाधार
स्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाचक्रब्रह्मरंध्रेषु स्वर्ण
विद्रुमनीलपिंगलस्वच्छकर्बुरश्वेतवर्णेषु स्थितेभ्यो गणपति
ब्रह्मविष्णुरुद्रजीवात्मपरमात्मगुरुपादुकाभ्यो यथाभागशः

समर्पयिष्यामि अथ पूर्वेद्युरहोरात्राचरितमेकविंशतिसहस्रं सं
ख्याकषट्शताधिकमजपाजपमहं करिष्ये इति संकल्प्य ॐ ऐं
क्लीं ह्रीं श्रीं मूलाधारचक्रस्थाय गणपतये अजपाजपानां षट्श
तानि समर्पयामि नमः ॐ स्वाधिष्ठानचक्रस्थाय ब्रह्मणे अज
पाजपानां षट्सहस्रं समर्पयामि नमः ॐ मणिपूरकचक्रस्था
य विष्णवे अजपाजपानां षट्सहस्रं समर्पयामि नमः ॐ अना
हतचक्रस्थाय रुद्राय अजपाजपानां षट्सहस्रं समर्पयामि नमः

ॐ विशुद्धचक्रस्थाय जीवात्मने अजपाजपानां सहस्रं समर्पयामि
नमः ॐ आज्ञाचक्रस्थाय परमात्मने अजपाजपानां सहस्रं सम
र्पयामि नमः ॐ सहस्रदलकमलमध्यवर्तिन्यै श्रीगुरुपादु
कायै अजपाजपानां सहस्रं समर्पयामि नमः इति समर्प्य अज
पामंत्रप्राणायामं विधाय अस्य श्रीअजपागायत्रीमंत्रस्य हं
स ऋषिः अव्यक्तगायत्री छंदः परमहंसो देवता हं बीजं सः श
क्ति सोहं कीलकं उदात्तस्वराः हंसो वर्णः नमःस्थाने ममोत्ता

र्थे जपे विनियोगः इति कृताञ्जलिः स्मृत्वा न्यसेत् हंसस्मृषये
नमः शिरसि अव्यक्तगायत्रीछंदसे नमो मुखे परमहंसो देव
तायै नमः हृदि हं बीजाय नमः गुह्ये सः शक्तये नमः पादयोः
सोहं कीलकाय नमः नाभौ उदानः स्वरः हृदये होमो वर्णः
कंठे नमः स्थाने मूर्ध्नि मम मोक्षार्थे जपे विनियोगः सर्वांगे
षु इति ऋष्यादिन्यासः अथ करन्यासः ओं हंसां सूर्यात्मने स्वाहा
अंगुष्ठाभ्यां नमः ओं हंसीं सोमात्मने स्वाहा तर्जनीभ्यां नमः ओं

गो॰ पु॰ ५

ह्रूं निरंजनात्मने स्वाहा मध्यमाभ्यां नमः ॐ ह्रैं निराभासात्मने
स्वाहा अनामिकाभ्यां नमः ॐ ह्रौं अनंततनुमहत्मादेवीशवो
दयात्स्वाहा कनिष्ठिकाभ्यां नमः ॐ ह्रः अव्यक्तबोधात्मने स्वा
हा करतलकरपृष्ठाभ्यां नमः इति करन्यासः अथ षडंगन्या
सः ॐ ह्रां सूर्यात्मने स्वाहा हृदयाय नमः ॐ ह्रीं सोमात्मने
स्वाहा शिरसे स्वाहा ॐ ह्रूं निरंजनात्मने स्वाहा शिखायै वषट्
ॐ ह्रैं निराभासात्मने स्वाहा कवचाय हुं ॐ ह्रौं अनंततनु।

९

स्वात्माक्षीप्रबोदयात्स्वाहा ह्रानेत्रत्रयाय वौषट् ॐ ह्रः अस्त्रक
वोधात्मने स्वाहा ह्रः अस्त्राय फट् इति षडंगन्यासः अथ ध्याने ॐ
द्यौ मूर्धानं यस्य विप्रा वदंति खं वै नाभिं चंद्रसूर्यौ च नेत्रे दिशिभ
श्रोत्रे यस्य पादौ क्षितिश्च ध्यातव्यो सौ सर्वभूतांतरात्मा इति वि
राट्स्वरूपं स्वात्मानं ध्यात्वा तदनु संधायी प्राणवायो निर्गमप्र
वेशात्मकं सोहमिति मंत्रं पंचविंशतिवारं जप्त्वा समर्प्य ॐ ग
मागमस्थं गमनादिशून्यं सच्चित्स्वरूपकाशं तिमिरांधकार प

गो॰ ह॰ १॰ 10

स्थाप्यंहंजगत्प्रधानंनमामिहंसंपरमात्मरूपं चिदानंदस्वरूपायसिंधो
गृहाणमदीजपंस्वयं संसिद्धिंसच्चिदानंदेसच्चिदानंदमर्पये ॐ
समुद्रमेखलेदेविपर्वतस्तनमंडले विष्णुपत्निनमस्तुभ्यंपाद
स्पर्शंक्षमस्वमे इतिपृथिवींसंप्रार्थ्य दक्षिणपादपुरःसरोबा
हिर्गछेत देवतापितरश्चैवगणानांपतयस्तथा उत्सतिसर्वे।
भूतानांवासभूमिंकरोम्यहं अश्वक्रांतेरथक्रांतेविष्णुक्रांते
वसुंदरि मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतं वाचाकृतंक

मंत्रेणमनसाचिंतयन्हरेत् स्नानिकेदेहिमेशुद्धिंत्वयिसर्वंप्रति।
ष्ठितं त्वयाकृतेनपापेनब्रह्मलोकंव्रजाम्यहं मृत्तिकामंडलेपि
उपविश्यपात्रंशुद्ध्यते शुद्धेतिसर्वभूतानिपविश्यपात्रंशुद्धयेत्
जलेदहतिपापानिजलेशरीरंशुद्ध्यति जलंहंतियज्जन्मानिज
लेश्वनमोक्षते जलेचअग्निस्थलेचअग्निंचवायुमंडले त्रिभिःश्र
मिप्रसादेनजलपात्रंविशुद्ध्यते ततोदेहंकृत्वा दंतधावनादिकं
कृत्वा मूलेनदंतकाष्ठंप्रक्षाल्य क्लींकामदेवायसर्वजनप्रियाय

गो. सू. ११

नमः इति दंतधावनं विधाय जिह्वामुल्लिख्य दंतकाष्ठं प्रक्षाल्य
पुरः शुद्धदेशे निक्षिपेत् नमोच्चारणेन घाटे तीर्थं गत्वा हस्तौ
पादौ च मुखं प्रक्षालनं कृत्वाचम्य लेवं षडंगन्यासं कृत्वा प्रा
णायामं च कृत्वा मलापकर्षणं स्नानं कृत्वा नाभिमात्रे जले।
स्थित्वा ब्रह्मा ब्रह्मलोकं याति शिवं याति शिवालये विष्णु।
याति वैकुंठं शिवलक्ष्मुक्तिं करोम्यहं ब्रह्मनाम सहस्राणि शि
वनाम शतानि च विष्णुनाम सहस्राणि शिवाख्यं च करोम्यहं

अथ संकल्पः ॐ अद्य श्रीब्रह्मणो द्वितीयप्रहरार्द्धे श्रीश्वेतवा
राहकल्पे अष्टाविंशतिमे कलौयुगे प्रथमचरणे जंबूद्वीपे
भारतखंडे आर्यावर्ते वैवस्वतमन्वंतरे अमुकमासे अमुक
पक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकतीर्थे
श्रीविष्णुप्रीत्यर्थं प्रातःस्नानमहं करिष्ये इति संकल्पः जले
प्रणवात्मकं त्रिकोणं कृत्वा अष्टदलमंडलं विलिख्य सूर्य
मंडलादंकुशमुद्रयात्मतीर्थमावाह्य ब्रह्मांडोदरतीर्थानि

गो॰ पू॰ १२

12

कौसल्यान्तितेरवे तेनसस्तेनमेदेहिनीर्थ्येदेहिदिवाकरं गं
गेवयमुनेचैवगोदावरिसरस्वती नर्मदेसिंधुकावेरिजले
स्मिन्सन्निधिंकुरु इत्यभिमंत्र्य अंकुशमुद्रयासिरसिचिर
ध्यसिंच्यादौमूलमुच्चारन् ततोनिरुद्धासमखिद्रस्त्रिमेन्त्रो
न्मस्तेनपुनरावमर्य मूलेनस्नात्वानेत्रेस्य मूलेनमृत्तिक
यास्नपनेविधाय मूलंपठन् स्वहृदयकमलान्मूलदेवंस
मुत्थाय वामनासयापूरःकल्पितनौर्थ्यमावाह्य तत्रवि

यिवत्स्नात्वा सकलीकृत्य मनसा संस्मृत्य ॐ भगुद्दयासे देव
तामावाहितां त्रिरभिषिच्य श्रवणादि सप्तछिद्राणि संरुध्वा
त्रिर्निमज्जनमनेन मृत्तिकया मूलेन ललाटे पुण्ड्रकं कुर्यात्
मूलेन वस्त्रमजलेन शोधयेत् ततो मूलेन त्रिर्देवं संतर्प्य स्वाह्
घानयेत् गायत्र्या शिखाबंधं कृत्वा इति स्नानविधिः वैदि
कीं संध्यां विधाय तांत्रिकीं संध्यां कुर्यात् यथा तत्र पूर्ववदाच
म्य प्राणायामं ऋष्यादि करषडंगन्यासान्विधाय पूर्ववत्तीर्थ

गो॰ मावाहा पुरःकल्पिततीर्थेसंयोज्य तेनजलेनतत्वमुद्रया
१०॰ ॐपें ह्रीं ह्रीं श्रीं अंनमः आंनमः इंनमः ईंनमः उंनमः ऊंनमः
११ ऋंनमः ॠंनमः लृंनमः लॄंनमः एंनमः ऐंनमः ओंनमः
औंनमः अंनमः अःनमः कंनमः खंनमः गंनमः घंनमः
ङंनमः चंनमः छंनमः जंनमः झंनमः ञंनमः टंनमः ठं
नमः डंनमः ढंनमः णंनमः तंनमः थंनमः दंनमः धंनम :
नंनमः पंनमः फंनमः बंनमः भंनमः मंनमः यंनमः रंन

13

मः लंनमः वंनमः शंनमः षंनमः संनमः हंनमः ळंनमः क्ष
शरीरं मस्तकादिपादांतं संप्रोक्ष्य वामहस्तेन जलं विधाय द
क्षहस्तेनाच्छाद्य अपसर्पंतु ते भूता ये भूता भूमिपालकाः ये भूता
विघ्नकर्तारस्तेनश्यंतु शिवाज्ञया हं यं रं लं वं बीजैरभिमंत्र्य ग
लितबिंदुभिः त्रिवारं समाधाय मूलेन शिरसि तत्त्वमुद्रया
अभिमार्जयेत् अष्टशिष्टं जलं दक्षिणहस्ते गृहीत्वा वामना
सापुटेघ्रात्वा देहांतरस्थेन पापराशिं प्रज्वाल्य कृष्णवर्णं

गो॰
पू॰
१८

14

नेत्रं दत्त्वा ग्रहस्ते विरचितं विचिंत्य पुरः कल्पितवज्रशिला
यां क्लीं अस्त्राय फट् इति क्षिपेत् ततः कुशपुष्पाक्षतामंज
लिमादाय उत्थाय मूलमंत्रेण श्रीकृष्ण पुष्पं ते अर्घ्यं स्वाहा
इत्यादिमंत्रेणाय उत्थायार्घ्यं दत्वा मूलेन तोपस्थाप्य
त्रैविंबस्थितं ध्यायेत् अथ गायत्रीं जपित्वा मूलेन त्रिवारं
तर्पयेत् ॐ गोपालाय हृदयाय नमः विद्महे शिरसे स्वाहा
गोपीजनवल्लभाय शिखायै वषट् धीमहि कवचाय हुं ततो

गोपालनेत्रत्रयाय वौषट् प्रचोदयात् अस्त्राय फट् इति हृदया
दिन्यासः अथ करन्यासः ॐ गोपालाय अंगुष्ठाभ्यां नमः वि
द्महे तर्जनीभ्यां नमः गोपीजनवल्लभाय मध्यमाभ्यां नमः
धीमहि अनामिकाभ्यां नमः तन्नो गोपाल कनिष्ठिकाभ्यां नमः
प्रचोदयात् करतलकरपृष्ठाभ्यां नमः इति करन्यासः अथ गोपा
लगायत्री ॐ गोपालाय विद्महे गोपीजनवल्लभाय धीमहि त
न्नो गोपालः प्रचोदयात् ॐ गोपीजनवल्लभाय विद्महे वासुदे

गो.
सू.
१५

वायधीमहि तन्नोरुद्रः प्रचोदयात् इतिगायत्री अर्घ्यजलादिना।
द्वारदेवताःपूजयेद्यथा गंगणेशायनमः दक्षे क्षंक्षेत्रपालायनमः
वामे हेंहाद्वारश्रियैनमः ऊर्ध्वे दंदेहल्यैनमः अधः वास्तुपुरुषायनमः
इतिद्वारदेवताःसंपूज्य वामांगचलनेनांतःप्रविश्य यागस्थानंविघ्नो
थयेद्यथा ॐमणिधरिवज्रिणिमहाप्रतिसरे हुंफट्स्वाहा इतिमंत्रेण
शिखाबंधनंकृत्वा ॐरक्षरक्ष हुंफट्स्वाहा इतिभूमिंसंशोध्य ॐअस्य
श्रीआसनशोधनमंत्रस्य मेरुपृष्ठऋषिः सुतलंछंदः कूर्मोदेवता

ग्रां बीजं ह्रीं शक्तिः क्लीं कीलकं श्रासनशोधनार्थे विनियोगः इति कृतांजलिस्सनातमेन मेरुपृष्ठ ऋषिये नमः शिरसि सुतलं छंदसे नमो मुखे कूर्मो देवतायै नमः हृदि ग्रां बीजाय नमो गुह्ये ह्रीं शक्तिये नमः नाभौ क्लीं कीलकाय नमः पादयोः श्रासनशोधनार्थे विनियोगः इति ऋष्यादिन्यासः अथ करन्यासः ॐ गोपालाय अंगुष्ठाभ्यां नमः गोविंदाय तर्जनीभ्यां नमः गोपीजनाय मध्यमाभ्यां नमः वल्लभाय अनामिकाभ्यां नमः स्वाहा कनिष्ठिकाभ्यां नमः हुं करतलकरपृष्ठाभ्यां नमः

गो॰ पू॰ १६

16

इतिकरन्यासः अथषडंगन्यासः ॐगोपालायहृदयायनमः गोविं
दायशिरसेस्वाहा गोपीजनायशिखायैवषट् वल्लभायकवचायहुं
स्वानेत्रत्रयायवौषट् हाअस्त्रायफट् इतिषडंगन्यासः पृथ्वित्वयाधृ
तालोकादेवित्वंविष्णुनाधृता त्वंचधारयमांदेविपवित्रंकुरुचासनं १
तिभूमिंप्रार्थ्य तत्रासनेनोपविश्य अथभूतशुद्धिंकृत्वा यथा ॐ
हैंहितालत्रयंदत्वा छोटिकाभिर्दशदिग्बंधनंकृत्वा इंद्रायनमः
अग्नयेनमः यमायनमः नैर्ऋत्यायनमः वरुणायनमः वायवेनमः

ऊवेरायनमः ईशानायनमः ब्राह्मणेऊर्ध्वनमः अनंतायपाताले।
भ्योनमः रं इति जलधारयाग्निप्रकारं मूलाधारावस्थितकुंडलि
न्यासहसुखम्नाचात्मना मूलाधारस्वाधिष्ठानमणिपूरकानाह
त विशुद्धाज्ञाषट्भेदनंकृत्वा शिरोवस्थितअधोमुखसहस्रदल
कमलकर्णिकांतर्गतपरमात्मनितत्त्वंसंयोज्य तेनैववकुंडलि
नीजीवात्मानंच लंपादादिजानुपर्यंतं पृथ्वीमंडलेवायुमंडले
विलापयामि रंनाभितंहृदयपर्यंतंवह्निमंडलेवायुमंडलेवि

गो॰ सू॰ १७ लापयामि यं इत्यादि सूक्ष्मपर्यंतं वायुमंडलं गगने विलापया
यामि हं गगनमंडलं अहंकारे अहंकारं महत्तिने प्रकृतौ तां प
रमात्मनि विलापयामि स परमात्मा गोपालो ऽहमस्मीति
भाव्य वामकुक्षौ श्मशानं स्तंभाकारं कृष्णरूपं पुरुषं विचिंत्य
प्राणायामानारभेत् यमिति वायुबीजं षोडशवारं जपन् १६
पूरकेन शोषणं भाव्य रमिति अग्निबीजं द्वात्रिंशद्वारं जपन्
३२ कुंभकेन दहनं भाव्य वमिति वरुणबीजं चत्वाषष्टिवारं ६४

17

जपन् रेचकं स्वावनं भाव्य ततस्तत्त्वानि परमात्मनः सका
शात्स्थानमानीय लं इति पृथ्वीवीजं षोडशवारं १६ जप
न् पूरकं कठिनं कृत्वा यमिति वायुवीजं कुंभे द्वात्रिंशद्वारं
३२ श्रवयेव करणं भाव्य हमिति खंवीजं श्रवकाशं भावय सो
हमिति नादं भावयेत् जीवात्मानं हंसमंत्रेण हृदयोडजमा
नीतं तेनैव पथेन कुलकुंडलनीयथास्थानमानयेत् आ
त्मानं इष्टदेवतारूपं विभाव्य हृदि हस्तं निधाय अथ प्राण

ममप्राणा

गो. प्रतिष्ठांकुर्यात् ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोऽहं श्री
पू. गोपालस्येहप्राणाः आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोऽहं श्री मम
१८ वस्येहस्थितः आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोऽहं सर्वेन्द्रिया
18 णीहस्थितानि आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोऽहं वाङ्मन
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणप्राणाइहागतस्सुखंचिरंतिष्ठंतुस्वाहा
षोडशप्राणावावर्तितकृत्वा प्राणिंपरांस्मरेत् जन्मादिसंस्कारा
दिभावयेत् इतिकृत्वाहिप्राणप्रतिष्ठांविधाय अथमात्

कन्यासः ॐ अस्य श्रीगोपालमंत्रस्य नारदऋषिः देवीगायत्री
छंदः श्रीगोपालोदेवता क्लींबीजं स्वाहाशक्तिः श्रीइतिकीलकं
इष्टार्थेजपेविनियोगः अथऋष्यादिन्यासः नारदऋषयेनमः
शिरसि देवीगायत्रीछंदसेनमः मुखे श्रीपरमात्मगोपालोदे
वतायैनमः हृदि क्लींबीजायनमः गुह्ये स्वाशक्तयेनमः पादयोः
हाइतिकीलकं इष्टार्थेजपेविनियोगः सर्वांगेषु इतिऋष्यादि
न्यासः अथकरन्यासः क्लींअंगुष्ठाभ्यांनमः कृष्णायतर्जनी।

गो॰
पु॰
१५
19

भ्यांनमः गोविंदायमध्यमाभ्यांनमः गोपीजनअनामिका।
भ्यांनमः वल्लभायकनिष्ठिकाभ्यांनमः क्लींस्वाहाकरतल।
करपृष्ठाभ्यांनमः इतिकरन्यासः अथषडंगन्यासः ॐक्लीं
हृदयायनमः कृष्णायशिरसेस्वाहा गोविंदायशिखायैवष
ट् गोपीजनकवचायहुं वल्लभायनेत्रत्रयायवौषट् क्लींस्वाहा
अस्त्रायफट् इतिषडंगन्यासः अथमंत्रः क्लींकृष्णायगोविं
दायगोपीजनवल्लभायस्वाहा इतिमंत्रः अथाक्षरन्यासः क्लीं

मूर्ध्नि हं भाले सं भ्रुवयोः यं नेत्रयोः गो कर्णयोः विं नासिक
योः दा ग्रीवे यं कंठे गो दोर्मूले पी कक्षदि जं उदरे नं नाभौ वं लिं
गे लं गुह्ये भं कट्यां स्वा गुल्फयोः हा पादयोः इत्यक्षरन्यासः
अथ तत्त्वन्यासं प्रवक्ष्यामि यं तत्त्वन्यासमात्रेण तत्त्वमेव प्रजाय
ते ॥ ॐ मं नमः पराय जीवतत्त्वात्मने नमः ॐ भं नमः पराय
प्राणतत्त्वात्मने नमः इति हृदये सर्वांगे ॐ वं नमः पराय बुद्धि
तत्त्वात्मने नमः ॐ फं नमः पराय अहंकारतत्त्वात्मने नमः पराय

गो. पृ. २०

20

ॐ पंहृदयेशब्दतत्वात्मनेनमः मूर्ध्निं यंनमः परायस्पर्शतत
त्वात्मनेनमः मुखे दंनमः परायरूपतत्वात्मनेहृदये ष्यंन
मः परायरसतत्वात्मनेनमः उपस्थे ॐ तंनमः परायगंयतत्वा
त्मनेनमः पादयोः ॐ णं नमः परायश्रोत्रतत्वात्मने नमः
श्रोत्रयोः ॐ ढंनमः परायतत्वात्मने नमः त्वचि ॐ डंनमः पा
रायतत्वात्मनेनमः चक्षुषि ॐ ठंनमः परायजिह्वातत्वात्मने
नमः जिह्वायां ॐ टंनमः परायघ्राणतत्वात्मनेनमः घ्राणे

ॐ ञं नमः पराय वाक्तत्वात्मने नमः वाचि ॐ झं नमः पराय।
पाणितत्वात्मने नमः पाण्योः ॐ जं नमः पराय पादतत्वात्मने
नमः पादयोः ॐ छं नमः पराय पायुतत्वात्मने नमः पायु ॐ
चं नमः पराय आकाशतत्वात्मने नमः मूर्ध्नि ॐ घं नमः परा
य वायुतत्वात्मने नमः मुखे ॐ गं नमः पराय तेजतत्वात्मने।
नमः हृदि ॐ खं नमः पराय सलिलतत्वात्मने नमः गुह्ये ॐ
कं नमः पराय पृथ्वीतत्वात्मने नमः पादयोः ॐ शं नमः पराय

गो० हृदयपद्मतत्वात्मने नमः ॐ हूं नमः पराय सूर्यमंडलतत्वात्मने
पु० नमः ॐ सं नमः पराय सोममंडलतत्वात्मने नमः ॐ रं नमः पराया
२१ ग्निमंडलतत्वात्मने नमः एतच्चतुष्टयं हृदि ॐ षं नमः पराय पर
21 मेष्ठितत्वात्मने नमः वासुदेवाय मूर्ध्नि ॐ यं नमः पराय पुरुषात्म
नेसंकर्षणाय नमः हृदि लं नमः पराय विश्वात्मने प्रद्युम्नाय न
मः नाभौ वं नमः पराय निवृत्यात्मने अनिरुद्धाय नमः गुह्ये
लं नमः पराय सर्वात्मने नारायणाय नमः व्यापकम् इति

तत्रन्यासः अथमातृकान्यासः अस्यमातृकान्यासमंत्रस्य ब्रह्मा
ऋषिर्गायत्रीछंदः मातृकासरस्वतीदेवता हलोबीजानि स्वराः
शक्तयः अव्यक्तंकीलकं ममश्रीमातृकाजपेविनियोगः अथ
ऋष्यादिन्यासः ब्रह्माऋषियेनमः शिरसि गायत्रीछंदसेनमः मुखे
मातृकासरस्वतीदेवतायैनमः हृदि हल्भ्योबीजानिनाभौ स्वराश
क्तयेनमः गुह्ये अव्यक्तंकीलकायनमः पादयोः ममश्रीमातृकान्यासे
विनियोगः सर्वांगेषु इतिऋष्यादिन्यासः अथकरन्यासः ॐअंकं

गो॰ ह॰ २२ 22

खंगंघंङं आं अङ्गुष्ठाभ्यांनमः इंचंछंजंझंञंईं तर्जनीभ्यांनमः
उंटंठंडंढंणंऊं मध्यमाभ्यांनमः एंतंथंदंधंनंऐं अनामिकाभ्यां
नमः ओंपंफंबंभंमंऔं कनिष्ठिकाभ्यांनमः अंयंरंलंवंशंषंसं
हंळंक्षंअः करतलकरपृष्ठाभ्यांनमः इतिकरन्यासः अथ
षडङ्गन्यासः अंकंखंगंघंङंआं हृदयायनमः इंचंछंजंझं
ञंईं शिरसेस्वाहा उंटंठंडंढंणंऊं शिखायैवषट् एंतंथंदंधंनंऐं
कवचायहुं ओंपंफंबंभंमंऔं नेत्रत्रयायवौषट् अंयंरंलंवंशंषंसं

हेलंहां: श्रं: इत्यस्त्राय फट् इति षडंगन्यास: अथ अंतर्मातृका

न्यास: अकारादिषोडशस्वरान्सविंदून्षोडशदलकमले।

कंठदेशेन्यसेत् ककारादिद्वादशवर्णान्द्वादशदलहृदयेन्य हां

सेत् डकारादिदशवर्णान्दशदलकमले नाभौ न्यसेत् ब

कारादिषट्दलकमले लिंगमूले न्यसेत् वकारादिचतुरो

वर्णान्चतुर्दलकमले गुदस्थाने न्यसेत् हकारादिद्विदल

कमले भ्रुवोर्मध्ये न्यसेत् ततो बाह्य अथ मातृकाध्यानम्

गो. पंचाशल्लिपिविभक्तमुखदोःपन्मध्यवक्षस्थलां भास्वन्मौलि
सू. निबद्धचंद्रशकलामापीनवक्षोरुहां मुद्राक्षवलगुणंसुधा
२१ कलशंविद्यांचहस्तांबुजे बिभ्राणांविशदप्रभांत्रिनयनां।
23 वाग्देवतामाश्रये एवंध्यात्वान्यसेत् यथा अंनमोललाटे
आंनमोमुखे इंनमःदक्षनेत्रे ईंनमःवामे उंनमःदक्षकर्णे
ऊंनमःवामे ऋंनमःनासे ॠंनमःओष्ठे ऌंनमःगंडयोः
एंनमः ऐंनमःअधरे ओंनमःऊर्ध्वदंते औंनमःअधोदंते

अं नमः ब्रह्मरंध्रे अः नमः मुखे कं नमः दक्षबाहुमूले खं नमः
कूर्परे गं नमः मणिबंधे घं नमः अंगुलिमूले ङं नमः अंगुल्य
ग्रे एवं पंचपंच वाहुमूलसंध्यग्रेषु पं नमः दक्षिणपार्श्वे
फं नमः वामपार्श्वे बं नमः नाभौ मं नमः उदरे यं नमः हृदि
रं नमः दक्षबाहुमूले लं नमः ककुदि वं नमः वामबाहुमूले
शं नमः हृदादिदक्षिणपादे षं नमः हृदादिवामे सं नमः हृ
दादिवामपादे हं नमः हृदादिदक्षे लं नमः हृदादि[illegible] ते।

गो॰
सू॰
२४
24

नमः सदाशिवाय नमः ततः प्राणायामः मूलमंत्रस्य वीजमंत्र
स्य प्रणवस्य वा षोडशवारं जपेन वामनासापुटेन वायुं पूर
येत् तस्य चतःषष्ठिवारं जपेन वायुं कुंभयेत् तस्य द्वात्रिंश
द्वारं जपेन दक्षिणेन वायुं रेचयेत् श्रीब्रह्मेश्वरहन्नेवोत्थाय
चिंतयेत् गुरुनायके रात्रिवासे परिमल्लासने उपविश्य श्री
गुरुभ्यो नमः परमगुरुभ्यो नमः परात्परमगुरुभ्यो नमः गु
दलिंगयोरंतराले मूलाधारे त्रिकोणं कामहीं बीजात्मके र

क्रवंर्णां त्रैगुण्याक्रांतं बिंदुं ध्यात्वा तद्धृदैतं तदिताभं ब्रह्मरंध्र
जगत्कारणं स्थाद्वैविवलयस्थितां मनोदंडेन निहत्यऽहंकारेण
मूलाधारात्स्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाख्य
षट्चक्रभेदक्रमेण तां कुंडलिनीं शिरःस्थिताधोमुखकमलेनी
ता तत्रस्थं चंद्रमंडलात् गलदमृतधारया मंत्रयष्ट्वा कुंडलि
नीं पुनरप्याज्ञाविशुद्धानाहतमणिपूरस्वाधिष्ठानक्रमेण मू
लाधारं स्थानं नयेत् एवमेव वारत्रयं चिंतयित्वा यथाशक्तिमूल

गो॰ मंत्रंजपेत् तज्जपंइष्टदेवंसमर्प्यप्रार्थयेत् इतिश्रीगोपालप
प॰ द्धतिसमाप्तम् ॥
२५
२५
२५
25

गो. ॐ श्रीगुरवे नमः ॐ कैलासशिखरे रम्ये गौरी पृच्छति शंक
स्त. रं ब्रह्माण्डाखिलनाथस्त्वं सृष्टिसंहारकारकः १ त्वमेव पूज्य
१ से लोकैर्ब्रह्मविष्णुसुरादिभिः नित्यं पठसि देवेश कस्य स्तो
त्रं महेश्वरं २ आश्चर्यमिदमाख्यातं जायते मयि शंकर त
त्प्राणेश महाप्राज्ञ संशयं छिन्धि शंकर ३ श्रीमहादेव उवा
च धन्यासि कृतपुण्यासि पार्वति प्राणवल्लभे रहस्याति

रहस्यं च यत्त्वं पृच्छसि वरानने ४ स्त्रीस्वभावान्महादेवि पुनस्त्वं
परिपृच्छसि गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ५ द
दैवसिद्धिर्हानिः स्यात्तस्माद्यत्नेन गोपयेत् इदं रहस्यं परमं पु
रुषार्थप्रदायकं ६ धनरत्नौघमाणिक्यतुरंगमगजादिकं
ददाति स्मरणाद्देवि महामोक्षप्रदायकं ७ तत्तेऽहं संप्रवक्ष्यामि
श्रृणुष्वावहिताऽप्रिये योऽसौ निरंजनो देवश्चित्स्वरूपी जनार्दनः ८
संसारसागरोत्तीर्णः करुणायत्तणं सदा श्रीगंगाइवरूपेण।

गो. स. १

त्रैलोक्यं व्याप्य तिष्ठति ९ ततो लोका महाहृष्टा विस्मयभक्तिवि
वर्जिताः निश्चयेनाधिगच्छंति नरनारायणो हरिः १० निरं
जनो निराकारो भक्तानां प्रीतिकामतः वृंदावनविहाराय।
गोपालरूपमुद्विरन् ११ मुरलीवादनाधारी राधायै प्रीतिमा।
वहन् अंशांशेभ्यः समुन्मीलत्पूर्णरूपकलायुतः १२ श्रीकृ।
ष्णेंद्रभगवान्नंदगोपविराजितः धरणीरूपिणीमातृयशोदानं
ददायिनी १३ द्वाभ्यां प्रयाचितो नाम्नो देवक्यां वसुदेवतः ब्रह्म

2

णाभ्यर्थितो देवो देवैरपि महेश्वरि १४ जातश्च समापित्रतो स्वर
लीवदेशिका तयामार्थे वचः श्रुत्वा ततो जातो महीतले १५
संसारसारसर्वस्वस्वरूपमलं महदुज्ज्वलं एतज्ज्योतिरहं देवं यचिंत
यामि सनातनं १६ गौरतेजो विनायस्वरूपमतेजः समर्चयेत्
जपेद्धा ध्यायते वापि समभेवसातकीर्णिवे १७ सब्रह्महा सुरा।
पी च स्वर्णस्तेयी च पंचमः एते दोषैर्विलिप्यंते तेजो भेदान्महे
श्वरि १८ तस्माज्ज्योतिरभेदेयागात्यामायचरूपकं तस्माद्देहम

ह्रादेविगोपालेनैवभाषितं १९ दुर्वासमोन्तेमोहाकालि
कांगममंडले ततःशक्रवतीगयासंदेहंभेदमात्मनः २०
निरंजनात्मगुप्तंमयादीनेजगन्मयि श्रीकृष्णेनततःप्रोक्तं
गयायैनारदायच २१ ततोनारदतःसर्वेविरलावैस्मवास्त
था कलौजानंतिदेवेशगोपनीयंप्रयत्नतः २२ शठायकृ
पणायाथदांभिकायसुरेश्वरि ब्रह्महत्यामवाप्नोतितस्मा
घत्नेनगोपयेत् २३ ॐअस्यश्रीगोपालसहस्रनामस्तोत्र

स्य नारदऋषिः अनुष्टुप्छंदः श्रीगोपालोदेवता कामो
बीजं मायाशक्तिः चंद्रः कीलकं श्रीकृष्णचंद्रभक्तिजनफ
लप्राप्तये श्रीगोपालसहस्रनामपाठे विनियोगः अथध्या
नं फुल्लेंदीवरकांतिमिंदुवदनं बर्हावतंसप्रियं श्रीवत्सा
कमुदारकौस्तुभधरंपीतांबरंसुंदरं गोपीनांनयनोत्पलो
चिंततनुंगोगोपसंघावृतं गोविंदंकलवेणुवादनपरं दिव्यां
गभूषंभजे १४ श्रीमहापालोमहीपालः सर्ववेदांगपारगः कृ

गो॰ स॰ ४

स्मः कमलपत्राक्षः पुंडरीकः सनातनः २४ गोपतिर्भूपतिः
शास्ता प्रहर्ता विश्वतोमुखः आदिकर्ता महाकर्ता महाका
लः प्रतापवान् २५ जगज्जीवो जगद्धाता जगद्भर्ता जगद्वसुः
मत्स्यो भीमः कुहूभर्ता हर्ता वाराहमूर्तिमान् २६ नारायणो
हृषीकेशो गोविंदो गरुडध्वजः गोकुलेंद्रो महाचंद्रः शर्वरीप्रि
यकारकः २७ कमलामुखलोलाक्षः पुंडरीकः सभावहः दु
र्वासाः कपिलो भूमिः सिंधुसागरसंगमः २८ गोविंदो गोपतिर्गो

ङ्कालिंदीप्रेमपूरकः गोस्वामीगोकुलेंद्रोगोगोवर्द्धनवरप्रदः ३०
नंदादीगोकुलत्रातादातादारिद्रभंजनः सर्वमंगलदाताचसर्व
कामप्रदायकः ३१ आदिकर्तामहीभर्तासर्वनागरसिंधुजः ग
जगामीगजोद्धारीकामीकामकलानिधिः ३२ कलंकरहितःचं
द्रोबिंबास्योबिंबसत्तमः मालाकाररूपाकारःकोकिलस्वरभूष
णः ३३ रामोनीलांबरोदेवोहलीदुर्दममर्द्दनः सहस्राक्षःपुरी
भेत्तामहामारीविनाशनः ३४ शिवःशिवतमोभेत्ताबलाराति।

गो॰ स॰ ५

प्रद्युम्नजनकः कुमारीवरदायी च वरेण्यो मीनकेतनः ३५ नरो ना
रायणो धीरो धीरापतिरुदारधीः श्रीपतिः श्रीनिधिः श्रीमा
न्मापतिः पतिराजहा ३६ वृन्दापतिः कुलग्रामी धामब्रह्मस
नातनः रेवतीरमणो रामः प्रियश्चञ्चललोचनः ३७ रामाय
णशरीरोयं रामी रामः श्रियःपतिः शर्वरः शार्वरी शर्वः सर्वत्र
शुभदायकः ३८ राधाराधयितो राधी राधाचित्तप्रमोदकः
राधारतिसुखोपेतो राधामोहनतत्परः ४० राधावशीकरो

5

राधाहृदयांभोजषट्पदः राधालिंगनसंमोदो राधानर्तन
कौतुकः ४१ राधासंजातसंप्रीतो राधाकाम्यफलप्रदः वृंदा
पतिः कोशनिधिः कोकशोकविनाशनः ४२ चंद्रापतिश्चंद्रप
तिश्चंडकोदंडभंजनः रामो दाशरथी रामो भृगुवंशसमुद्भवः ४३
आत्मारामो जितक्रोधो मोहो मोहांधभंजनः वृषभानुभवो भा
वी काश्यपिः करुणानिधिः ४४ कोलाहलो हली हालो हली हल
धरप्रियः राधामुखाब्जमार्तंडो भास्करो रविजो विधुः ४५ वि।

गो॰ यिर्विंध्याताववृष्णोवाकृष्णोवाकृष्णीप्रियः रोहिणीहृदयानंदी
स॰ वसुदेवात्मजोवली ४६ नीलांवरोरोहिणेयोजरासंधवधोम
६ लः नागोनवांभोविरुद्धोवीरहावरदोवली ४७ गोपथोविज
6 यीविद्वान्शिपिविष्टःसनातनः परशुरामवचोग्राहीवरग्राही
सृगालहा ४८ दमघोषोपदेष्टावरथग्राहीसुदर्शनः वीरपा
त्नीयशाःत्राताजराव्याधिविघातकः ४९ द्वारिकावासतत्त्वज्ञोहु
ताशनवरप्रदः यमुनावेगसंहारीनीलांवरधरःप्रभुः ५० विभुः

शगामनोथन्वीगणेशोगणनायकः लक्ष्मणोलक्ष्मणोल।
लोरक्तोवेषविनाशनः ५१ वामनोवामनीभूतोवामनोवा
मनारुहः यशोदानंदनःकर्तायमलार्जुनमुक्तिदः ५२ उलू
खलीमहामानोदामवद्धाह्वयीशमी भक्तानुकारीभगवान्
केशवोवलधारकः ५३ केशिहामधुहामोहीवृषासुरविघात
कः अघासुरविनाशीचपूतनामोक्षदायकः ५४ कुब्जाविनो
दीभगवान्कंसमृत्युर्महामखी अश्वमेधोवाजपेयोगोमेधोनर

गो. मेघवान् ५५ कंदर्पकोटिलावण्यश्चंद्रकोटिसुशीतलः रवि
स. कोटिप्रतीकाशो वायुकोटिमहाबलः ५६ ब्रह्माण्डखंडकर्त्ता
च कमलावांछितप्रदः कमलेकमलाक्षश्च कमलामुखलोलुपः
कमलाव्रतधारी च कमलाभपुरंदरः सौभाग्याधिकचित्तोयं ।
महामायीमदोत्कटः ५७ तारकारिः सुरत्राता मारीचक्षोभका
रकः विश्वामित्रप्रियो दांतो रामो राजीवलोचनः ५८ लंकाधिप
कुलध्वंसी विभीषणवरप्रदः सीतानंदकरो रामो वीरो वारिधिबंधन :

वेष्टावलिपतिः स्थूलः केशीकंसवधोमलः माधवोमधुहामाधी
माधीकोमाधवीविभुः ६१ मुञ्जाटवीगाहमानो धेनुकारिर्धरा
त्मजः वंशीवटविहारी च गोवर्द्धनवनाशयः ६२ तथा तालवनो
द्देशी भांडीरवनसंकहा तृणावर्तकृपाकारी वृषभानुसुताप
तिः ६३ राधाप्राणसमो राधावदनाब्जमधुव्रतः गोपीरंजनदै
वज्ञो लीलाकमलपूजितः ६४ क्रीडाकमलसंदोहो गोपिकाप्री
तिरंजनः रंजको रंजनो रंगो रंगी रंगमहीरुहः ६५ कामःका

गो॰ मारिभक्तोयं पुराणः पुरुषः कविः नारदो देवलो भीमो व्या।
स॰ लोवालाशुकोमुनी ९६ ग्रंथितो ब्रह्मसातीव योगी दत्तवरो
८ मुनिः ऋषभः पर्वतो ग्रामो नदीपक्षनवल्लभः ९७ पद्मनाभः सु
8 रश्रेष्ठो ब्रह्मा रुद्रो हि भूषितः गणानां त्राणकर्ता च गणेशो ग्रा।
हिलो ग्रही ९८ गणाश्रयो गणाध्यक्षो क्रोडीकृतजगत्त्रयः या
दवेन्द्रो द्वारकेन्द्रो मथुरावल्लभो धुरी ९९ भ्रमरः कुन्तली कुन्ती सुत
रक्तो महामखी यमुनावरदाता च कश्यपस्य वरप्रदः शंखचूड

वयोहासीगोपीरत्नणतमरः पांचजन्यकरोरामीत्रिरामीव
नजोजयः २० फाल्गुनःफाल्गुनसखाविराधवधकारकः रु
क्मिणीप्राणनाथश्चसत्यभामाप्रियंकरः २१ कल्पवृक्षोमहा
वृक्षोदानवृक्षोमहाफलः अंकुशोभूसुरोभावोभामकोभ्राम
कोहरिः २२ सरलःशाश्वतोवीरोयदुवंशीशिवात्मकः प्रद्यु
म्नोबलकर्त्ताचप्रहर्त्तादैत्यहाप्रभुः २३ महाधनोमहावीरोवन
मालाविभूषणः तुलसीदामशोभाढ्योजालंधरविनाशनः २४

गो॰ स॰ ९

शूरःसूर्योमृकंडश्चभास्करोविश्वपूजितः रविस्तमोहाव
ह्निश्चवाडवोवडवानलः १५ दैत्यदर्पविनाशीचगरुडोगरु
डाग्रजः गोपीनाथोमहानाथोवृंदानाथोविरोधकः १६ प्र
पंचीपंचरूपश्चलतागुल्मश्चगोपतिः गंगाचयमुनारूपो
गोदावेत्रवतीतथा १७ कावेरीनर्मदातापीगंडकीसरयूरज :
राजसस्तामसःसत्वीसर्वांगीसर्वलोचनः १८ सुधामयोमृत
मयोयोगिनीवल्लभःशिवः बुद्धोबुद्धिमतांश्रेष्ठोविष्णुर्जिष्णुः

शचीपतिः ७६ वेशीवेशधरोलोकोविलोकोमोहनाशनः
स्वरोवेरवोरवोवालोवालावलाहकः ८० शिवोरुद्रोनलो
नीलोलांगुलीलांगुलाश्रयः पारदःपावनोहंसोहंसारूढो
जगत्पतिः ८१ मोहनोमोहनीमायामहामायीमहामखी वृ
षोवृषाकपिःकालःकालीदमनकारकः ८२ ऊर्ध्वाभागव
देवीरोरजकत्रयकारकः कोमलोवारुणोराजाजलजोजल
धारकः ८३ हारकःसर्वपापघ्नःपरमेष्ठीपितामहः खड्गधारी

गो॰ कृपाकारीसपारमणोमंदरः ८५ द्वादशारण्यसंभोगीशेषना
स॰ गफणालयः कामःश्यामःसुखःश्रीदःश्रीहःश्रीहपतिकृतिः ९२
१॰ हरिर्हरोनरोनारोनरोत्तमःइषुप्रियः गोपालीचित्तहर्त्ताचकर्ता
संसारतारकः ८६ आदिदेवोमहादेवोगौरीगुरुरणाश्रयः सा
धुर्मधुर्विधुर्धातात्राताक्रूरपरायणः ८७ रोलंबीचहयग्रीवो
वानरारिर्वनाश्रयः वनेवनीवनाध्यक्षोमहावंद्योमहामुनिः ८ ८
सीमंतकमणिःप्राप्तोविनीतोविघ्नविघातकः गोवर्द्धनोवर्द्धनी

योवर्द्धनीवर्द्धनप्रियः ८९ वार्द्धन्योवर्द्धनीवर्द्धीवार्द्धिन्यः सुमुखप्रि
यः वर्द्धितोऽहङ्कारोऽहङ्कृदारकजनप्रियः ९० गोपालरमणीभर्ता
शोवऊषणविनाशनः रुक्मिणीहरणप्रेमाप्रेमीचन्द्रावलीपतिः ९१
श्रीकर्ताविश्वभर्ताचनारायणनरोबली गणोगणपतिश्चैवद
त्तात्रेयोमहामुनिः ९२ व्यासोनारायणोदिव्योभव्योभावुकधारकः
स्वःश्रेयः शंशिवंभद्रंभावुकंभविकंशुभं ९३ शुभात्मकः शुभः शास्ता
प्रशास्तामेघनादहा ब्रह्मण्यदेवोदीनानामुद्धारकरणक्षमः ९४

गो. कृष्णःकमलपत्राक्षःकृष्णःकमललोचनः कृष्णःकामीसदाकृ
११ ष्णःसमस्तप्रियकारकः ९५ नंदोनंदीमहानंदीमादीमादनकः
किली मिलीहिलीगिलीगोलीगोलीगोलालयोगुली ९६ गु
ग्गुलीमारकीशाखीवटःपिप्पलकःकृती म्लेच्छहाकालहर्ताच
यशोदायशएवच ९७ अच्युतःकेशवोविष्णुर्हरिःसत्योजनार्दनः
हंसोनारायणोनीलोलीनोभक्तिपरायणः ९८ जानकीवल्लभोरा
मोविरामोविघ्ननाशनः सहस्रभानुर्महाभानुर्वीरबाहुर्महोदधिः ९९

समुद्रोक्षीरकूपारः पारावारः सरित्पतिः गोकुलानंदकारी च प्र
तिज्ञापरिपालकः १॰ सदारामः कृपारामो महारामो धनुर्धरः
पर्वतः पर्वताकारो गयो गेयो द्विजप्रियः १ कमलाश्वतरो रामो
रामायणप्रवर्तकः द्यौर्दिवो दिवसो दिव्यो भव्यो भावी भयापहः २
पार्वतीभाग्यसहितो भ्राता लक्ष्मीविलासवान् विलासी साहसी
सर्वांगर्वीगर्वितलोचनः ३ मुरारिर्लोकधर्मज्ञो जीवनो जीवनां
तकः यमो यमारिर्यमनो यामी यामविधायकः ४ वंशुलीपा।

गो॰
स॰
१२

12

ष्ठलीपांशुःपांडुरङ्गेनवल्लभः ललिताचंद्रिकामालीमालीमालो
धुजाश्रयः ५ श्रंभुजातोमहायत्तोदत्तोचिंतामणिःप्रभुः मणिदि
नमणिश्चैवकेदारोवद्रीश्रयः ६ वद्रीवनसंप्रीतोव्यासःसत्यव
तीसुतः अमरारिनिहंताचसुधासिंधुविधूदयः ७ देवारविःशिवः
शूलीचक्रीचैवगदाधरः श्रीकर्त्ताश्रीपतिःश्रीदःश्रीदेवोदेवकीसु
तः ८ श्रीपतिःपुंडरीकाक्षःपद्मनाभोजगत्पतिः वासुदेवोप्रमेया
त्माकेशवोगरुडध्वजः ९ नारायणःपरंधामदेवदेवोमहेश्वरः च

क्रपाणिः कलाशर्ण्णो वेदवेद्यो दयानिधिः ९ भगवान्सर्वभूतेशो
गोपालः सर्वपालकः अनंतो निर्गुणोनंतो निर्विकल्पो निरंजनः
निराधारो निराकारो निराभासो निराश्रयः पुरुषः प्रणवः सार्थो
मुकुंदः परमेश्वरः १० नणावर्तिः सार्वभौमो वैकुंठो भक्तिवत्सलः
विश्वदामोदरः कृष्णो माधवो मथुरापतिः ११ देवकीगर्भसंभूतो य
शोदावत्सलो हरिः शिवः संकर्षणः शंभुर्भूतनाथो दिवस्पतिः १ ४
अव्ययः सर्वधर्मज्ञो निर्मलो निरुपद्रवः निर्वाणनायको नित्यो नी

लज्जीभूतसन्निभः १५ कलात्तयश्च सर्वज्ञः कमलारूपतत्परः हृ
षीकेशः पीतवासा वसुदेवप्रियात्मजः १६ नंदगोपकुमारार्यो न
वनीताशनो विभुः पुराणः पुरुषः श्रेष्ठः शंखपाणिः सुविक्रमः १७
अनिरुद्धश्चक्ररथः शार्ङ्गपाणिश्चतुर्भुजः गदाधरः सुरार्तिघ्नो गो
विंदो नंदकायुधः १८ वृंदावनचरः शौरिर्वेणुवाद्यविशारदः तृ
णावर्तांतको भीमः साहसो बहुविक्रमः १९ शकटासुरसंहारी ब
कासुरविनाशनः धेनुकासुरसंघातः पूतनारिर्नृकेसरी २० पि

नामहाग्रहः साक्षी प्रत्यगात्मा सदाशिवः अप्रमेयः प्रभुः प्राज्ञो
अप्रतर्क्यः स्वप्नवर्धनः २१ धन्यो मान्यो भवो भावो धीरः शांतो जगद्गु
रुः अंतर्यामीश्वरो दिव्यो दैवज्ञो देवसंस्तुतः २२ क्षीराब्धिशयनो
धाता लक्ष्मीवाल्लक्ष्मणाग्रजः धात्रीपतिरमेयात्मा चंद्रशेखरपू
जिता २३ लोकसाक्षी जगच्चक्षुः पुण्यचारित्रकीर्तनः कोटिमन्म
थसौंदर्यो जगन्मोहनविग्रहः २४ मंदस्मिततनो गोपगोपि
कापरिवेष्टितः फुल्लारविंदनयनश्चाणूरांध्रनिसूदनः २५ ३

दीवरदलश्यामोवर्हिवर्हावतंसकः मुरलीनाददक्षोदीप्ति
वमालाविराजितः २६ सुकपोलयुगः सुभ्रूयुगलः सुललाटकः
कंबुग्रीवोविशालाक्षोलक्ष्मीवान्शुभलक्षणः २७ पीनवक्षा
श्चतुर्बाहुश्चतुर्मूर्तिस्त्रिविक्रमः कलंकरहितःशुद्धोदुष्टशत्रु
निबर्हणः २८ किरीटकुंडलधरःकनकांगदमंडितः मुद्रिका
भरणोपेतःकटिसूत्रविराजितः २९ मंजीररंजितपदःसर्वाभर
णभूषितः विन्यस्तपादयुगलोदिव्यमंगलविग्रहः ३० गोपिका

नयनानंदः शरच्चंद्रनिभाननः समस्तजगदानंदः सुंदरो लोक
नंदनः ॥ यमुनातीरसंचारी राधामन्मथवैभवः गोपनारीप्रियो
दांतो गोपीवस्त्रापहारकः ॥ शृंगारमूर्तिः श्रीधामा तारको मूल
कारणं सृष्टिसंरक्षणोपायः क्रूरासुरविभंजनः ॥ नरकासुरसं
हारी मुरारिर्वैरिमर्दनः आदितेयप्रियो दैत्यभीकरो यदुशेखरः १४
जरासंधकुलध्वंसी कंसारातिः सुविक्रमः पुण्यश्लोकः कीर्तनीयो
यादवेंद्रो जगन्नुतः १५ रुक्मिणीरमणः सत्यभामाजांबवतीप्रि

गो॰ स॰ १५

यः स्त्रीविंदानन्दजितो लक्ष्मणामनुपासिता २६ सत्याकारक्रोडे
जातोनंतःप्रबलविक्रमः सर्वसौभाग्यसंपन्नो द्वारकायामुपस्थि
तः २७ भद्रासूर्यसुतानाथो लीलामानुषविग्रहः सहस्रषोडशी
स्त्रीशो भोगमोक्षैकदायकः २८ वेदांतवेद्यः संवेद्यो वैद्यो ब्रह्मां
डनायकः गोवर्द्धनधरो नाथः सर्वजीवदयापरः २९ मूर्तिमान्स
र्वभूतात्मा आर्तत्राणपरायणः सर्वज्ञः सर्वसुलभः सर्वशास्त्रवि
शारदः ३० षड्गुणैश्वर्यसंपन्नः पूर्णकामो धुरंधरः महानुभावः

15

कैवल्यधामको लोकनायकः ४१ आदिमध्यान्तरहितः शुद्धसा।
त्त्विकविग्रहः प्रेममानः समस्तात्मा शरणागतवत्सलः ४२ ३
सतिस्थितिसंहारकारणं सर्वकारणं गंभीरः सर्वभावज्ञः सच्चि
दानंदविग्रहः ४३ विश्वक्सेनः सत्यसंधः सत्यवाक्सत्यविक्रमः
सत्यव्रतः सत्यसंज्ञः सत्यधर्मपरायणः ४४ आपन्नार्तिप्रशमनो।
द्रौपदीमानरक्षकः कंदर्पजनकः प्राज्ञो जगन्नाटकवैभवः ४५
भक्तवश्यो गुणातीतः सर्वैश्वर्यप्रदायकः दमघोषसुतद्वेषी वा।

णवाहुविछेदनः ४६ भीष्मभक्तिप्रदोदिव्यःकौरवान्वयनाशन ः
कौंतेयप्रियबंधुश्चपार्थस्यंदनसारथिः ४७ नारसिंहोमहावीरः
स्तंभजातोमहाबलः प्रह्लादवरदःसत्योदेवपूज्योभयंकरः ४८
उपेंद्रइंद्रावरजोवामनोबलिबंधनः गजेंद्रवरदःस्वामीसर्वदेव
नमस्कृतः ४९ शेषपर्यंकशयनोवैनतेयरथोजयी अव्याहत।
बलैश्वर्यसंपन्नःपूर्णमानसः ५० योगीश्वरेश्वरःसाक्षीक्षेत्रज्ञो।
ज्ञानदायकः योगिहृत्पंकजावासोयोगमायासमन्वितः ५१

नादविंदुकलातीतश्चतुर्वर्गफलप्रदः सुषुम्णामार्गसंचारीदे
हस्यांतरसंस्थितः ५२ देहेंद्रियमनःप्राणसाक्षीचेतःप्रसादकः
सूक्ष्मःसर्वगतोदेहीज्ञानदर्पणगोचरः ५३ तत्त्वत्रयात्मकोव्यक्तः
कुंडलीसमुपाश्रितः ब्रह्मण्यःसर्वधर्मज्ञःशांतोदांतोगतक्लमः ५४
श्रीनिवासःसदानंदीविश्वमूर्तिर्महाप्रभुः सहस्रशीर्षापुरुषःस
हस्राक्षःसहस्रपात् ५५ समस्तभुवनाधारःसमस्तप्राणरक्षकः
समस्तःसर्वभावज्ञोगोपिकाप्राणवल्लभः ५६ नित्योत्सवोनि

गो॰ स॰ १७

गसौख्यो नित्यश्रीर्नित्यमंगलं सुहृच्चित्तो जगन्नाथो श्रीवैकुंठ
गयिपः ८७ हर्षानंनेत्रो नवनीभक्तो गोपवेषधरो हरिः कलापकुसु
मश्यामः कोमलः शांतविग्रहः ८८ गोपांगनावृतोनंतो वृंदाव
नसमाश्रयः वेणुवादरतः श्रेष्ठो देवानां हितकारकः ८९ बाल
क्रीडासमासक्तो नवनीतस्य तस्करः गोपालकामिनीजारो चौ
रजारशिखामणिः ९० परंज्योतिः पराकाशः परावासः परिस्फुटः
अष्टादशाक्षरो मंत्रो व्यापको लोकपावनः ९१ सप्तकोटिमहामंत्र

शोकवेगादेवशोकेश: विज्ञानज्ञानसंधानस्तेजोराशिर्जगत्पतिः ९ २
भक्तलोकघनज्ञात्मा भक्तकामदाश्रविग्रहः भक्तदारीप्रदमनो भ
क्तानां प्रीतिदायकः ९३ भक्तादीनमनःप्रेमा भक्तलोकवशंक
रः भक्ताभीष्टप्रदः सर्वभक्ताघौघनिकृंतनः ९४ अपारकरुणा
सिंधुर्भगवान्भक्ततत्परः इतिश्रीराधिकानाथसहस्रनामकी
र्तितं ९५ स्मरणात्पापराशीनां खंडनं मृत्युनाशनं वैष्णवानां
प्रियकरं महारोगनिवर्हणं ९६ ब्रह्महत्यासुरापानं परस्त्रीग

गो. मनं तथा परद्रव्यापहरणं परद्वेषसमन्वितं ९७ मानसं वाचिकं
स. कायं यत्पापं पापसंभवं सहस्रनामपठनात्सर्वं नश्यति तत्क्ष-
१८ णात् ९८ महादारिद्र्ययुक्तो यो वैष्णवो विष्णुभक्तिमान् कार्ति-
क्यां यः पठेद्रात्रौ शतमष्टोत्तरं क्रमात् ९९ पीताम्बरधरो धीमा-
न्सुगन्धिपुष्पचन्दनैः पुस्तकं पूजयित्वा च नैवेद्यादिभिरेव च
राधाध्यानाङ्कितो धीरो वनमालाविभूषितः शतमष्टोत्तरं देवि
पठेन्नामसहस्रकं १ चैत्रशुक्ले च कृष्णे च कुहूसंक्रान्तिवासरे

पठितव्यं प्रयत्नेन त्रैलोक्यं मोहयेत्क्षणात् । तुलसीमालया युक्तो
वैष्णवो भक्तितत्परः । रविवारे च शुक्रे च द्वादश्यां श्राद्धवासरे ॥ १३
ब्राह्मणान्भोजयित्वा च भोजयित्वा विधानतः । पठेन्नाम सहस्रं च तत
ः सिद्धिः प्रजायते ॥ १४ महानिशायां सततं वैष्णवो यः पठेत्सदा
देशान्तरगता लक्ष्मीः समायाति न संशयः ॥ १५ त्रैलोक्ये च महादेव ॥
सुन्दर्यः काममोहिताः । मुग्धाः स्वयं समायान्ति वैष्णवं च भजन्ति ताः ॥ १६
रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बन्धनात् । गुर्विणी जनयेत्पुत्रं क

गो॰
स॰
११८

गोविंदेति समस्तं राज्ञा च वश्यतां याति किं पुनः स्वल्पमानुषः स
हस्रनामश्रवणात्पठनात्पूजनात्प्रिये १८ धारणात्सर्वमाप्नोति
वैस्रवो नात्र संशयः वंशीवटे चान्यवटे तथा पिप्पलकेऽथवा कदंब
पादपतले गोपालमूर्तिसन्निधौ यः पठेत्स्रवो नित्यं स याति हरि
मंदिरं ८ कृष्णेनोक्तं राधिकायै मया प्रोक्तं पुरा शिवे नारदाय मया
प्रोक्तं नारदेन प्रकाशितं ८१ मया त्वयि वरारोहे प्रोक्तमेतत्सुदुर्ल
भं गोपनीयं प्रयत्नेन न प्रकाश्यं कथंचन ८२ शठाय पापिने चैव

लेपटायविशेषतः नदातव्यंनदातव्यंनदातव्यंकदाचन ९३ देयं
शिष्यायशांतायविष्णुभक्तिरतायच गोदानेब्रह्मयज्ञस्यवाजपे
यशतेनतथा ९४ अश्वमेधसहस्रस्यफलंपाठेभवेद्ध्रुवं मोहंनैल
भंनैवमारणोच्चाटनादिकं ९५ यद्यद्वांछतिचित्तेनतत्तत्प्रा
प्नोतिवैष्णवः एकादश्यांनरःस्नात्वासुगंधिद्रव्यतैलकैः ९६
प्राहारंब्राह्मणेदत्वादक्षिणांस्वर्णभूषणं ततआरंभकर्तासौ
सर्वंप्राप्नोतिमानवः ९७ शतावर्तंसहस्रंवयःपठेद्वैसवोजनः

गो० स० २०

श्रीवृंदावनचंद्रस्यप्रसादात्सर्वमाप्नुयात् ८८ यत्रगेहेपुस्तकंदे
विपूजितंचैवतिष्ठति नमारीनचदुर्भिक्षंनोपसर्गभयंक्वचित् ८९
सर्पादिभूतयक्षाद्यानश्यंतिनात्रसंशयः श्रीगोपालोमहादेवि
वसेत्तस्यगृहेसदा ८९ यत्रगेहेसहस्रंचनाम्नांतिष्ठतिपूजितं ९
इतिश्रीसंमोहनतंत्रेईश्वरपार्वतीसंवादेश्रीगोपालसहस्रना
मस्तोत्रंसंपूर्णम् ॥

20

गो॰ क॰ १

ॐश्रीगणेशायनमः ॐगुरवेनमः ॐअस्यश्रीगोपाल
कवचमंत्रस्य नारदऋषिः देवीगायत्रीछंदः श्रीगो
पालोदेवता क्लींबीजम् स्वाहाशक्तिः इष्टार्थेजपेवि
नियोगः अथऋष्यादिन्यासः ॐक्लींअंगुष्ठाभ्यांनमः
ॐकृष्णायतर्जनीभ्यांनमः ॐगोविंदायमध्यमाभ्यां
नमः ॐगोपीजनअनामिकाभ्यांनमः ॐवल्लभाय
कनिष्ठकाभ्यांनमः ॐस्वाहाकरतलकरपृष्ठाभ्यां

नमः ॐ क्लीं ह्रदयायनमः ॐ कृष्णायशिरसेस्वाहा ॐ
गोविंदायशिखायैवौषट् गोपीजनकवचायहुं वल्ल
भायनेत्रत्रयायवौषट् स्वाहास्त्रायफट् इतिह्रदयादि
न्यासः पुलस्त्यउवाच भगवन्सर्वधर्मज्ञकवचंयत्प्र
काशितम् त्रैलोक्यमंगलंनामकृपयाकथयप्रभो
सनत्कुमारउवाच ॐ शृणुदेविप्रवक्ष्यामिकवचंपर
माद्भुतं नारायणेनकथितंकृपयाब्रह्मणेपुरा ब्रह्म

गो
क०
२

णाकथितंमन्त्रंपरंस्नेहाद्ददामिते प्रतिगृह्णतमेविप्रसर्वं
मंत्रौघविग्रहं यज्ज्ञात्वापठनाद्ब्रह्मासृष्टिवितनुतेध्रुवं
यज्ज्ञात्वापठनाद्वापिमहालक्ष्मीजगत्त्रयं पठनाद्धारणा
द्विष्णुसंहितासर्वतत्त्ववित् त्रैलोक्यजगतीदुर्गामहि
षादिमहासुरान् वधेदृष्टान्जघानतेवपवनाद्धारणा
यतः पयसिद्धादयासर्वेपरमैश्वर्यमाप्नुयुः शिष्या
यविस्रभक्तायसाधकायप्रकाशयेत् शठायपरशि

2

ध्यायन्नेतामरत्त्वमवाप्नुयात् त्रैलोक्यमंगलस्यास्यक
वचस्यप्रजापतिः ऋषिश्छन्दस्त्वगायत्रीदेवोनाराय
णः स्वयं धर्मार्थकाममोक्षार्थेविनियोगः प्रकीर्तितः
प्रणवोमेशिरः पातुनमोनारायणायच भालंपाया
न्नेत्रयुग्ममष्टार्णोभुक्तिमुक्तिदः क्लींपायाच्छ्रोत्रयुग्मे
चैकाक्षरः सर्वमोहनः क्लींकृष्णायसदाघ्राणंगोविं
दायेतिजिह्विकां गोपीजनपदवल्लभायस्वाहाननं

गो॰
क॰
३
3

मम अष्टादशाक्षरो मंत्रः कंठं पातु दशाक्षरः क्लीं ग्लौं
क्लीं श्यामलांगाय नमः स्कंधौ दशाक्षरः गोपीजनपद
वल्लभाय स्वाहा भुजद्वयं क्लीं करौ पायात् क्लीं कृष्णायां
गुले पातु क्लीं कृष्णाय सदावतु हृदयं भुवनेशी च क्लीं
कृष्णाय क्लीं स्तनौ मम गोपालायाग्निजायामेक द्वित्र
यं सदावतु क्लीं कृष्णाय सदा पातु पार्श्वयुग्ममनुत्तमे
कृष्ण गोविंद कौ पातु स्मरायेोडे॰यत्नो मन्त्रः अष्टाक्षरः

पान्तनाभिं क्रस्मेतिफत्तरोमन्तुः ६ हंक्लींक्रस्मकंकालंक्लीं
क्रस्मायहिठांतकः सक्थिनीमननेपान्तश्रींह्रींक्लींक्रस
वह्रयं ऊरूसमानत्तरापान्तत्रयोदशान्तरोवतुः श्रींह्रीं
क्लींपादत्तोगोपीजनवल्लभपदंननः मायस्वाहान्तेपा
न्तवैक्लींह्रींश्रींवदशार्णकः जानुनीचसदापान्तक्लीं
श्रींक्लींचदशान्तरः त्रयोदशान्तरःपान्तजंघेचकाम
दापुयः श्रीमन्मकुंदचरणौप्रपद्येशरणंसदा इति

गो॰ कः ५

शरणमंत्रस्यपादौपायात्सेदाममअष्टादशाक्षरोह्रींश्री
सर्वकोविंशावर्णकः सर्वांगंमेमहापातद्वारिकानाय
कोवलीनमोभगवतेपश्चाद्दामहदेवायतत्परनारायण
द्वादशार्णायंयंप्राच्यांमांसर्वदावतुह्रींश्रींक्लींदशावर्ण
क्लींह्रींश्रींषोडशाक्षरः गदाभृदाभृयोविस्मर्गीम
रिनदिशिरक्षतुह्रींश्रींदशाक्षरोमंत्रोदक्षिणेमांसदा
वतुनारोनमोभगवतेरुक्मिणीवल्लभायचस्वाहे

त्रिषोडशार्णोयंनेत्रंस्यादिशिरस्तु क्लींहृषीकेशपदंशायन
मोवांवारुणोवतु अष्टादशार्णकामोनेवायवोमांसदावतु
श्रीमायाकामकृष्णायगोविंदायद्विठोमनुः द्वादशार्णात्म
कोविस्फकस्त्वैमोसदावतु वाग्भवेकामकृष्णायह्रींगो
विंदायततःपरं श्रीगोपीजनपदंवल्लभायस्वाहाचासौम
नः द्वाविंशदक्षरोमंत्रोमामैशान्यांसदावतु कालियस
फणामध्येदिव्यंनृत्यंकरोतितं नमामिदेवकीपुत्रंनृत्य

गो॰ क॰ ५

राजानमच्युतं ह्रींविष्णुदत्तरोमंत्रोपद्योमां सर्वदावतु कृष्ट
नयंतर्यं श्रुक्तमभिपातु सदा मम ब्रह्माणी:पातु सर्वांगे पा
त्वगोपालसुंदरी ह्रीं क्लीं कामदेवाय विद्महे पुष्पबाणा
य धीमहि तन्नोऽनंगः प्रचोदयात् देवामोपातु चोर्ध्वकः
क्लीं इति ते कथितं विप्र सर्वमंत्रौघविग्रहं त्रैलोक्यमं
गलं नाम कवचं ब्रह्मरूपिणं ब्रह्मेशाद्यमुखोपीशानारा
यणमुखात्श्रुतम् तव स्नेहान्मयाख्यातं प्रवक्तव्यं न क

स्पचित् गुरुमभ्यर्च्यविधिवत्कवचं पठेत्ततः सकृत्
द्वित्रियथाज्ञानं सोपि सर्वैस्तपोमयः मंत्रेषु सकलेष्व
वदेशिकोनात्र संशयः शतमष्टोत्तरं वापि पुरश्चर्याविधि
र्विस्मृतः हवनादीन्दशांशेन कृत्वा तत्साधयेद्ध्रुवम्
यदि चेत्सिद्धिकवचो विभुरेव लभेत्स्वयं मंत्रसिद्धि
र्भवेत्तस्य पुरश्चर्याविधानतः स्पर्शीमङ्गवमवनेल
क्ष्मीवाणीवस्मत्सुखं पुष्पांजलिष्टकं दत्वा मूलेनै

गो
क०
८

वपठेत्सकृत दशावर्षसहस्राणिप्रजायाः फलमाप्नुया
त् भूर्जेविलिख्यगुटिकांस्वर्णस्थांधारयेद्यदि कंठेवाद
क्षिणेबाहौसोपिविष्णुर्नसंशयः पठनाद्धारणात्सर्वा
पृथ्वीमफगुरीसमा यत्रतत्रविपन्नोपिमथुरायांमृतो
भवेत् अश्वमेधसहस्राणिवाजपेयशतानिच महा
दानानियान्येवप्रददातिप्रभुवस्तथा कलानार्हन्तिता
न्येवसकृदुच्चारणान्नयः कवचस्यप्रसादेनजीवन्मु

6

ऽभवेन्नरः त्रैलोक्यंक्षोभयेत्सैवत्रैलोक्यंविजयीभ
वेत् इदंकवचमज्ञात्वाभवेद्यःपुरुषोत्तम शीतल
स्तस्यजप्तोपितमंत्रःसिद्धिदायकः इतिश्रीसनत्कु
मारसंहितायांत्रैलोक्यमंगलंनामगोपालकव
चंसमाप्तम् ॥ शुभम् ॥

6

गो॰ ॐ श्रीगणेशाय नमः अथ स्तवराजं प्रवक्ष्यामि अथास्य श्री
स्तो॰ गोपालस्तोत्रस्य नारदऋषिः अनुष्टुप् छंदः श्रीकृष्णः
१ परमात्मा देवता श्रीकृष्णप्रीत्यर्थे जपे विनियोगः अ
थ ध्यानं ॐ फुल्लेंदीवरकांतिमिंदुवदनं बर्हावतंसप्रि
यं श्रीवत्सांकमुदारकौस्तुभधरं पीतांबरं सुंदरम् गो
पीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविं
दं कलवेणुवादनपरं दिव्यांगभूषं भजे १ सजलज

लदनीलंदर्शिनोज्ञारम्हलं कान्तलक्ष्मनशैलंवेणुवाद्यैर
सालं व्रजजनकुलपालंकामिनीकेलिलोलं तरुण
तुलसिमालंनौमिगोपालबालं २ नारदउवाच नवी
ननीरदश्यामंनीलेंदीवरलोचनं वल्लवीनंदनंवंदेकृ
ष्णंगोपालरूपिणं ३ स्फुरद्बर्हिदलोद्बद्धनीलकुंचि
तमूर्धजं कदंबकुसुमोद्बद्धवनमालाविभूषितं ४
गंडमंडलसंसर्गीचलत्कांचनकुंडलं स्थूलमुक्ताफ

स्तो लोहारसरोयोजितवक्षसं ५ हेमांगदतुलाकोटिकिरीटो
२ ज्वलविग्रहं मंदमारुतसंक्षोभवलितांबरसंचयं ६ रुचि
2 रोरुपुटंन्यस्तवंशीमधुरनिःस्वनैः लसद्गोपालिकाचेतो
मोहयंतमुहुर्मुहुः वल्लवीवदनांभोजमधुपानमधु
व्रतं क्षोभयंतंमनस्तासां मस्मीरापांगवीक्षणैः यवनो
द्भिन्नदेहाभिःसंसक्ताभिःपरस्परं विचित्रांबरभूषाभिगो
पनारीभिरावृतं प्रभिन्नांजनकालिंदीजलकेलिकलो

त्मके योगपीठेनैकविघ्नोपान्त्याहरंतंतवंशगतं कालिंदी
जलसंसर्गिशीतलानिलकंपिते कदंवपादपछाये
स्थितंवृंदावनेक्वचित् रत्नभूधरसंलग्नरत्नासनपरि
ग्रहं कल्पपादपमध्यस्थहेममंडपिकागतं वसंत
कुसुमामोदसुरभीकृतदिङ्मुखे गोवर्धनगिरौरम्ये
स्थितंरासरसोत्सुकं सव्यहस्ततलन्यस्तगिरिवर्या
तपत्रकं खंडिताखंडलोन्मुक्तमुक्ताहारघनाघन वे

गो एवादमहोल्लासकृतहुंकारनिःस्वनैः सवत्सैरनुस्वैः
स्तो शश्वद्गोपालैरभिवीक्षिते क्षणमेवानुगायद्भिस्तवेषा
३ वशावर्तिभिः दंडपाशोद्यतकरैर्गोपालैरुपशोभिते
नारदाद्यैर्मुनिश्रेष्ठैर्वेदवेदांगपारगैः प्रीतिस्वस्निग्ध
3 यावाचास्तूयमानं परात्परं इयमं चिंतयेद्देवं भक्त्या स
स्तौतिमानवः त्रिसंध्यं तस्य तुष्टो सौ ददाति वरमी
प्सितं राजवल्लभतामेति भवेत्सर्वजनप्रियः अच

लोक्षियमाप्नोतिसर्वान्कामीञ्जायतेफलवम् ॥ इतिश्री
गौतमीतंत्रेगोपालस्तवराजः समाप्तम् ॥ शुभम्

श्रीनगर मध्ये ... लकं लि तं तिर्दं १९३५

8

९२
२५
२०
१
४

नं. १२३